**শ্রীকৃষ্ণকৃতং দুর্গস্তোত্রম্**

শ্রীকৃষ্ণ উবাচ

ত্বমেবসর্বজননী মূলপ্রকৃতিরীশ্বরী।
ত্বমেবাদ্যা সৃষ্টিবিধৌ স্বেচ্ছয়া ত্রিগুণাত্মিকা । ।
কায়ার্থে সগুণা ত্বং চ বস্তুতো নির্গুণাস্বয়ং ।
পরব্রহ্মস্বরুপা ত্বং সত্যা নিত্যা সনাতনী। ।
তেজঃস্বরুপা পরমা ভক্তানুগ্রহবিগ্রহা ।
সর্বস্বরুপা সর্বেশা সর্বাধারপরাত্পরা । ।
সর্ববীজস্বরুপা চ সর্বপূজ্যা নিরাশ্রয়া ।
সর্বজ্ঞা সর্বতোভদ্রা সর্বমঙ্গলমঙ্গলা । ।
সর্ববুদ্ধিস্বরুপা চ সর্বশক্তি স্বরুপিণী ।
সর্বজ্ঞানপ্রদা দেবী সর্বজ্ঞা সর্বভাবিনী । ।
ত্বং স্বাহা দেবদানে চ পিতৃদানে স্বধা স্বয়ম্ ।
দক্ষিণা সর্বদানে চ সর্বশক্তি স্বরুপিণী ।।
নিদ্রা ত্বঞ্চ দয়া ত্বঞ্চ তৃষ্ণা ত্বঞ্চ চাত্মনঃ প্রিয়া ।
ক্ষুত্ক্ষান্তিঃ শান্তিরীশাচ কান্তিঃ সৃষ্টিশ্চ শাশ্বতী । ।
শ্রদ্ধা পুষ্টিশ্চ তন্দ্রাচ লজ্জা শোভা দয়া তথা ।
সতাং সম্পত্স্বরুপা শ্রীর্বিপত্তিরসতামিহ। ।
প্রীতিরুপা পুণ্যবতাং পাপীনাং কলহাঙ্কুরা ।
শশ্বত্কর্মময়ী শক্তিঃ সর্বদা সর্বজীবিনাম্ । ।
দেবেভ্যো স্বপদদাত্রী ধাতুর্ধাত্রী কৃপাময়ী ।
হিতায় সর্বদেবানাং সর্বাসুরবিনাশিনী ।।
যোগনিদ্রা যোগরুপা যোগদাত্রী চ যোগীনাং ।
সিদ্ধিস্বরুপা সিদ্ধানাং সিদ্ধিদাতা সিদ্ধিযোগিনী । ।
মাহেশ্বরী চ ব্রহ্মাণী বিষ্ণুমায়া চ বৈষ্ণবী ।
ভদ্রদা ভদ্রকালী চ সর্বলোকভয়ঙ্করী । ।
গ্রামে গ্রামে গ্রাম্যদেবী গৃহদেবী গৃহে গৃহে ।
সতাং কীর্তি প্রতিষ্ঠা চ নিন্দা ত্বমসতাং সদা । ।
মহাযুদ্ধে মহামারী দুষ্টসংহাররুপিণী ।
রক্ষাস্বরুপা শিষ্টানাং মাতৈব হিতকারিণী । ।
বন্ধাপূজ্যা স্তুতা ত্বঞ্চ ব্রহ্মাদীনাঞ্চ সর্বদা ।
ব্রাহ্মণ্যরুপা বিপ্রাণাং তপস্যা চ তপস্বিনাম্ । ।
বিদ্যা বিদ্যাবতাং ত্বঞ্চ ব্রহ্মাদীনাং চ সর্বদা ।
মেধাস্মৃতিস্বরুপাচ প্রতিভা প্রতিভাবতাম্। ।
রাজ্ঞা প্রতাপরুপাচ বিশাং বাণিজ্যরুপিণী ।
সৃষ্টৌ সৃষ্টিস্বরুপা ত্বং রক্ষারুপাচ পালনে। ।
তথান্তে ত্বং মহামারী বিশ্বস্য বিশ্বপূজিতে ।
কালরাত্রির্মহারাত্রির্মোহরাত্রিশ্চ মোহিনী । ।
দুরত্যয়া মে মায়া ত্বং যয়া সম্মোহিতং জগত্ ।
যয়া মুগ্ধো হি বিদ্যাশ্চ মোক্ষমার্গ ন পশ্যতি । ।
ইত্যাত্মনা কৃতং স্তোত্রং দুর্গয়া দুর্গনাশনম্ ।

Published on: Jan, 14 2023 13:34

পূজাকালে পঠেদ্ যো হি সিদ্ধির্ভবতি বাঞ্ছিতা ।।
বন্ধাচ কাকবন্ধাচ মৃতবত্সাচ দুর্ভগা ।
শ্রুত্বা স্তোত্রং বর্ষমেকং সুপুত্রং লভতে ধ্রুবম্ ।।
কারাগারে মহাঘোরে যো বদ্ধো দৃঢ়বন্ধনে ।
শ্রুত্বা স্তোত্রং মাসমেকং বন্ধনান্মুচ্যতে ধ্রুবম্ ।।
যক্ষগ্রস্তো গলত্কুষ্টি মহাশূলী মহাজ্বরী ।
শ্রুত্বা স্তোত্রং বর্ষমেকং সদ্যো রোগাত্প্রমুচ্যতে ।।
পুত্রর্ভেদে প্রজার্ভেদে পত্নীর্ভেদে চ দুর্গতঃ ।
শ্রুত্বা স্তোত্রং মাসমেকং লভতে নাত্র সংশয়ঃ ।।
রাজদ্বারে শ্মশানেচ মহারণ্যে রণস্থলে ।
হিংস্রজন্তুসমীপে চ শ্রুত্বা স্তোত্রং প্রমুচ্চতে ।।
গৃহদাহেচ দাবাগ্নে দস্যুসৈন্যসমন্বিতে ।
স্তোত্রশ্রবণমাত্রেণ লভতে নাত্র সংশয়ঃ। ।
মহাদরিদ্রো মুর্খশ্চ বর্ষ স্তোত্রং পঠেতু যঃ ।
বিদ্যাবান ধনবাংশ্চৈব স ভবেন্নাত্র সংশয়ঃ ।।

ইতি শ্রীব্রহ্মবৈবর্তপুরাণে প্রকৃতিখন্ডে শ্রীকৃষ্ণকৃতং দূর্গাস্তোত্র সম্পূর্ণম্ ।।

Published on: Jan, 14 2023 13:34